International Journal of Sanskrit Research 2017; 3(1): 148-150

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(1): 148-150
© 2017 IJSR
www.anantaajournal.com
Received: 26-11-2016
Accepted: 29-12-2016

**डॉ० सिद्धि कुमार झाः**
विष्णबरुआरः, खजौली, मधुबनी, बिहार, भारत

**Corresponding Author:**
**डॉ० सिद्धि कुमार झाः**
विष्णबरुआरः, खजौली, मधुबनी, बिहार, भारत

# संस्कृतव्याकरणानुसारेण पदानां वाक्यानाञ्च प्रयोगविधिः

**डॉ० सिद्धि कुमार झाः**

**सारांशः**
भाषायां पदस्य वाक्यस्य च प्रयोगो भवति। केवलं धातोः प्रातिपदिकस्य प्रत्ययस्य च प्रयोगो न भवति। पदस्यापि प्रयोगो वाक्यद्वारैव भवति। तदनुसारं प्रयोग इत्यस्य वाक्यप्रयोग इत्यर्थो भवति। अद्यत्वे प्रयोगशब्दस्य स्थाने 'रचना' शब्दः प्रयुज्यते। [1] रचनाया अर्थो निर्माणम् अस्ति। रचनायाः किं लक्षणं? तत्र कथयितुं शक्यते– नियमानुकूलं विचारपूर्वकं संकलितशब्दानां विभक्तियोगेन यथोचितपरिवर्तनपूर्वकं परस्परसमन्वितरुपेण क्रमानुसारेणोपस्थापनं, येन पूर्णभावः प्रकाशितो भवेत् सा रचनास्ति। वाक्ये पदानां परस्परं समन्वयस्य औचित्यपूर्वकं लालित्यमेव रचनेति कथ्यते। शब्दानां समन्वयश्च लिङ्ग–वचन–कारक –कालादीनामाधारेण भवति। संस्कृतरचानायां (वाक्यप्रयोगे) चतुर्धा समन्वयः परमावश्यको भवति [2]–

1. कत्रा सह क्रियायाः समन्वयः।
2. संज्ञया सर्वनाम्नः समन्वयः।
3. विशेष्येण विशेषणस्य समन्वयः।
4. सम्बन्धिवाचिना सम्बन्धवाचकस्य (सम्बन्धवतः) समन्वयः।

**प्रस्तावना**
वाक्ये कर्तृक्रिययोः समन्वयो मुख्यो भवति। तत्र क्रियैव मुख्या, तदितरत् सर्वं तद्विशेषणमेव भवति। तया च ''एकतिङ्वाक्यम्''। [3] इति महाभाष्यप्रोक्तवाक्यलक्षणस्य एकतिङ्न्तार्थनिष्ठमुख्यविशेष्यताकं वाक्यामिव्यर्थं कुर्वन्ति। [4] वैयाकरणाश्च व्यापारमुख्यविशेष्यकं शाब्दबोधं स्वीकुर्वन्ति। [5]
अपरमतानुसारेण वाक्ये कारकस्य मुख्यतः कर्तुः प्राधान्यम् भवति। इतरेषां कर्मादीनां क्रियायाश्च तदधीनतैव भवति। क्रियाजनकं कारकम् [6] करोति–क्रियां निर्वर्तयतीति कारकम्[7] इत्यादि लक्षणैः वाक्ये मूलतत्त्वं कारकमेव यत् क्रियां सम्पादयति। अथकिम् वाक्येदलद्वयं भवति यथा– 1) उद्देश्यं 2) विधेयञ्च। तत्र क्रिया एव विधीयते, कर्मादीन् साधयतीति कर्मादि सहिता क्रिया विधेयदले भवति। कर्त्ता तद्विशेषणानि च उद्देश्यदले भवन्ति। ''चच्छब्दयोगः प्राथम्यम् इत्याद्युद्देश्य लक्षम्'' [8], इत्युक्तेः उद्देश्यस्वरूपस्य कर्तुः प्राथम्येन उपस्थितिरेव तस्य प्राधान्यं सूचयति। अतएव प्रयोगसंग्रहकारेण वररुचिना कारकस्य ज्ञानं प्रथमं कार्यमित्युक्तम्– ''प्रयोगमिच्छता ज्ञातुं ज्ञेयं करकमादितः [9]। इति
अस्य तात्पर्यमिदं यत् कारकं हि स्वसमन्वययोग्यां क्रियाम् आकर्षति। अतो वाक्ये कारकज्ञानं सर्वप्रथम् आवश्यकं भवति। कारकज्ञानं हि प्रातिपदिके सुब्विभक्तियोगेन ज्ञायते, नान्यथा। अतः तद्विभक्तिज्ञानमावश्यकमेवास्ति। ''सुप्तिडन्तं पदम् [10] इति पाणिनीयसूत्रद्वारा सुप्प्रत्यान्तस्य तिङ्. प्रत्यान्तस्य च पदसंज्ञा क्रियते। प्रयोगस्तु पदस्यैव भवति, नापदस्य तथा चोक्तम्– ''अपदं न प्रयुञ्जीत।'' [11] इति। संज्ञा–सर्वनाम–विशेषणैः सुप्विभक्तिः संयुज्यते। धातुमिः सह तिङ्विभक्तिः संयुज्यते।
पूर्णार्थबोधकः (पूर्णाशयकः) परस्परसाकांक्षः पदसमूहो वाक्यम् कथ्यते। ''पदसमूहो वाक्यमर्थसमाप्तौ'' इति न्यायभाष्यकार आह। अमरसिंहनोक्तम्– ''सुप्तिङ्न्तचयो वाक्यं, क्रिया वा कारिकान्विता'' इति। तदनुसारेण वाक्यस्थपदानां परस्परम् आकाङ्क्षा, योग्यता, आसक्तिश्चावश्यकी। एता हि शाब्दबोधे सहकारिकारणानि भवन्ति। [12] यद्यपि संस्कृतभाषा विभक्तिप्रधाना भवति। नियतविभक्तिकं पदं कस्मिन्नपि स्थाने भवतु, बोधो भवत्येव। यथा– इन्द्रो जलं वर्षति। जलं वर्षति इन्द्रः, वर्षति जलम् इन्द्रः इत्यादिस्थानपरिवर्त्तनेन अर्थे सामान्यतो भेदो न भवति। तथापि स्थानापरिवर्त्तने बोधे बिलम्बो भवत्येव।
अतएव श्लोकस्थपदानामन्वयो यत्नतः करणीयो भवति। किञ्च राम एव गच्छति, गच्छत्येव राम इत्यादौ स्थानपरिवर्त्तनेन अर्थभेदोऽपि भवति। अतः वाक्यस्थपदानां क्रमविषये स्वभाविकी स्थितिर्ज्ञातव्या भवति। यद्यपि एतादृशो नियमः शास्त्रे निर्धारितो नास्ति। तथाप्याधुनिकविद्वद्भिः प्रचलित प्रयोगाधारेण तादृशो नियमो निरुपितः। [13] तथाहि–

1. पूर्वमेवोक्तं यद् वाक्ये उद्देश्यदलं पूर्वं, विधेयदलं च पश्चाद् भवति। उद्देश्यदले कर्त्ता प्रधानो भवति। अतएव वाक्ये कर्त्ता प्रथमस्थाने आयाति। यदि सम्बोधनपदं भवेत्तर्हि वाक्यादौ तस्यैव स्थानं भवेत्।
2. सामान्यरुपेण विशेषणप्रयोगः प्रागेव भवति, विशेष्यञ्च तदनन्तरं भवेत्। किन्तु उद्देश्यभूतं कर्तुर्विशेषणं पूर्वं भवति, विधेयस्वरुपं विशेषणं तु कर्त्तुः पश्चादेव आयाति। यथा–सुन्दरो बालो गच्छति। बालोऽयं सुन्दरोऽस्ति। बालः विशेष्यस्वरूपोऽस्ति, तस्य उद्देश्यतया विशेषणं सुन्दरः पूर्वमस्ति। किन्तूत्तरवाक्ये बाले सुन्दरत्वं प्रतिपाद्यतया विधेयगतमतएव सुन्दरशब्दस्य विशेषणत्वेऽपि पर– प्रयोग एव। सामान्यतो ज्ञातस्योद्देश्यत्वम ज्ञाप्यस्य च विधेयत्वमित्यपि ध्यातव्यम्। [14]
3. गुणवाचक– सार्वनामिकयो र्विशेषणयोः सार्वनामिकं विशषणं पूर्वं दातव्यम्। यथा–स चतुरः बालको विद्यते।
4. कर्त्तुः पश्चात् कर्म स्थाप्यम्। तत्रापि तद्विशेषणं पूर्वं ततः कर्म दातव्यम्।
5. कर्मणो विशेषणं यदि क्रियासम्बद्धं भवेत्तदा तत् कर्मणोऽनन्तरं स्थाप्यम्। यथा– स त्वां मूर्खं मन्यते।
6. क्रियाविशेषणं क्रियासमीपे पूर्वं देयम्। यथा– रामः शीघ्रं धावति।
7. षष्ठ्यन्तं पदं स्वसम्बद्धपदेन सह पूर्वं तिष्ठति। यथा– रामस्य जनकः आगच्छति।
8. विशेषणं विशेष्यस्याव्यवहितपूर्वं तिष्ठति।
9. सकर्मकक्रियातः पूर्वं कर्म तिष्ठति।
10. समबन्धसूचकमव्ययं सम्बन्धि शब्दात् पूर्वं भवति।
11. 'एव'–'अपि' इत्येतौ स्वसम्बन्धितः परमेव तिष्ठति, तत्र शब्दान्तरव्यवधानं नोचितम्। [15]
12. अधिकरणं सामान्यतः कर्तुः परं कर्मणश्च पूर्वं भवति, किन्तु स्थानवाचकं कालवाचकं वा बहुधा वाक्यारम्भेव शोभते तस्मिन् पर्वते मुनिरस्ति, पूर्वकाले अहं स्वस्थः आसम्।
13. अपि शब्दस्य यदि वाक्यादौ प्रयोगः क्रियते तदा वाक्यं प्रश्नवाचकं भवति यथा–

**अपि क्रियार्थं सुलभं समित्कुशं?**
**जलान्यपि स्नानविधिक्षमाणि ते।**
**अपि स्वशक्त्या तपसि प्रवर्तसे?**
**शरीमाद्यं खलु धर्मसाधनम्।। [16]**

14. वाक्यादौ अथ, अथवा, अपि च, किञ्चेत्यादि यदि प्रयुज्यते तत्र अधिकरणं तदनन्तरं देयम् यथा– अथ कमिंश्चिद् दिने सन्यासी आगतः।
15. क्रियान्विताधिकरणं क्रियासमीपे पूर्वमेव भवति। यथा–कृष्णो नदीतटे तिष्ठति।
16. वाक्यादौ अस् धातुप्रयोगे बहुधा प्रश्नावाचकं वाक्यं भवति, यथा– अस्ति ते इच्छा पठितुम्?
17. प्रश्नवाचकवाक्ये अपि, कथं, किम्, अथ इत्यादिशब्दा वाक्यादौ भवन्ति। यथा– कथम् अयमेवं करोति?
18. च, [17] वा, चेत्, तु, हि, इव, एव, खलु, अपि, नाम, नु, किल, जातु, स्वित्, ह, स्म, वै इत्यादयः शब्दाः वाक्यारम्भे न देयाः। यथा रामं भाणिष्यति चेत् सुखं प्राप्स्यसि।
19. वाक्यस्य शोभायै यदा कदा कविभिः अस्ति, आसीत् बभूव इत्यादिविधेयपदस्य वाक्यादौ प्रयोगः क्रियते। यथा [18]–

**"अस्ति भागीरयीतीरे विशालः शाल्मलीतरुः।"**

**कर्तृक्रिययोः समन्वयः**

वाक्ये सर्वर्पथमं ज्ञातव्यं भवति यत् क्रिया यं कर्तारं सर्वितोभावेन आश्रितास्ति तेन सह तस्याः समन्वयो भवेत् परन्तु सर्वत्र कर्तुः अनुसारेणैव क्रिया न भवति, अपि तु क्रियायां यः प्रत्ययो भवति स एव तस्याः केन सह समन्वयो भवेदित्यस्य निर्णयं करोति। विषयेऽस्मिन् प्रयोगसंग्रहे उक्तम् [19] –

**तिङ.ा कार्तर्याभिहिते ..... कारकस्यैष संग्रहः "इति।।**

अनेन स्पष्टं भवति यत् कर्तर्यर्थे यदा तिङ्.प्रत्ययः धातुसंयुक्तो भवति तदा कर्तुः प्रथमा विभक्तिः भवति। यदि प्रत्ययेन कर्ता न अभिधीयते कर्तुस्तृतीया अथवा षष्ठी विभक्तिर्भवति। यदि तिङ्.प्रत्ययस्य कृत्प्रत्ययस्य वा कर्मार्थो भवति, तदा कर्मणि प्रथमा विभक्तिः भवति। यदि तिङ्.प्रत्ययः कर्मणि न भवति तदा कर्मस्वरूपात् शब्दात् द्वितीयादिविभक्तिर्भवति, न प्रथमा, न पञ्चमी नापि च सप्तमी। इत्यादि एवमेव तिङ.र्थविषये वररूचिना प्रतिपादितम् [20]

**"परस्मै कर्तरि ज्ञेयं न भावे नापि कर्मणि।**
**आत्मने त्रिषु विज्ञेयं भावे कर्मणि कर्तरि।।**
**धातोरकर्मकाद् भावे प्रथमैकवचनं भवेत।**
**सकर्मकाकर्मकाच्च कर्तरि स्मृतात्मने।।" इति।**

तदनुसारं तिङ्.प्रत्ययस्य कर्ता, कर्म, भाव इत्येषु कश्चिदेकोऽर्थः भवति। यदा कर्ता अर्थः तदा तस्य कर्तृकारकात् सुबन्तपदात् समन्वयो भवति, यदा च कर्मार्थः तदा कर्मकारकात् सुबन्तपदात् समन्वयो भवति, यदा पुनः भावः (क्रियामात्रम्– कर्तृकर्मरहितम्) अर्थो भवति तदा न केनापि समन्वयः अपितु तस्य रूपं सदैव प्रथमपुरुषैकवचने एव गृह्यते। अनेन प्रयोगाणामवस्थात्रयं भवति–
1. कर्त्तृवाच्यम् 2. कर्मवाच्यम् 3. भाववाच्यञ्चेति। कर्त्तृवाच्ये [21] कर्ता यास्मिन् वचने पुरुषे च भवति क्रियापि तस्मिन्नेव वचने पुरुषे च भवति। यथा– गजः पिबति गजौ विपतः, गजाः, पिबन्ति। क्रिदन्तस्थलेऽपि कर्तृक्रिययोः लिङ्.गसमन्वयः कर्तव्यो भवति। यथा– रामो गतः सीता गतवती, बालकौ पठितवन्तौ, बालके पठितवन्त्यौ, बालिकाः पठितवन्त्यः।

**निष्कर्षः**

क्रियायाः यद् विशेषणं तत्र नपुंसकलिंगैकवचनं प्रथमाविभक्तिश्चैव भवति। यथा– कोकिलो मधुरं रौति। स मन्दं गच्छति।
विशेषण हि विशेष्यानुसारं भवति अर्थात् तस्य समन्वयः विशेष्येण सह भवति अर्थात् तस्य समन्वयः विशेष्येण सह भवति। तद् विशेष्याधीनविभक्तिं धारयति। एतद्विषये एकः श्लोको वर्तते–

**यल्लिगं यत् वचनं या च विभक्ति र्विशेष्यस्य। [22]**
**लल्लिगं तद्वचनं साच विभक्ति र्विशेषणस्यापि।।**

यथा– गच्छन् पुरुषः, गच्छन्ती नारी,का तृप्तिः, कानि वचनानि, शोभना शाटी इत्यादयः। किन्तु कतिपये एतादृशाः शब्दाः सन्ति ये स्वतन्त्रतया विशेष्यानुरोधं_विहाय नपुंसकैकवचने भवन्ति – पात्रं, आस्पदं, स्थानं, पदं प्रमाणं, भाजनम् यथा– 'गुणाः पूजास्थानं गुणिषु,' [23] आर्यमिश्रा [24] प्रमाणम्। सम्पदः परमापदाम्। 'वेदाः प्रमाणम्' इत्यादि। एवमेव कर्मवाच्ये कर्मकारकात् प्रथमा विभक्ति र्भवति। क्रिया च कर्मानुसारिणी भवति। यथा– त्वया वनं गम्यते वने गम्येते, वनानि गम्यन्ते। अहं तेन दृश्ये, वालकेन युवां दृश्येथे, यूयं दृश्यध्वे। कर्मवाच्ये कर्तरि तृतीया विभक्ति र्भवति। इतरत् कारकं यथावत् स्वां– स्वां विभक्तिमाश्रयन्ति।

**संदर्भाः**


1. संस्कृतरचना – भी0एस0 आप्टे।
2. संस्कृतरचना प्रकाश– पृ0–1
3. वार्तिकम्।
4. वाक्यवादः पृ0 – 10
5. परमलघुमञ्जुषा– धात्वर्थः।
6. संस्कृतव्याकरणम्– पं0 रामचन्द्र झा– कारकम्।

7. महाभाष्यम्– 'कारके' इति सूत्रे।
8. व्युत्पत्तिवादे।
9. प्रयोग संग्रहः – श्लोकः–1
10. अष्टाध्यायी– अ0 1.1.14
11. महाभाष्यम्।
12. परमलघुमञ्जुषा– आकांक्षाविचारः।
13. संस्कृतरचना प्रकाशः – पृ0 7
14. मैथिली भाषा का विकास – पं0 गोविन्द झा पृ0270
15. मिथिलाभाषाविद्योतन (व्याकरण)– पं0 दीनबन्धु झा एव अपि प्रकरण।
16. कुमारसम्भवम्– पञ्चमोंकः।
17. योजकशब्दः 'च' इति द्वयोः शब्दयोः अन्ते तिष्ठति। यदि मध्ये तिष्ठति, तर्हि अन्तेऽप्यवश्यं दातव्यः यथा– रामो लक्ष्मणश्च, रामश्च लक्ष्मणश्च। न तु रामश्च लक्ष्मणः इति।
18. हितोपदेशः – मित्रलाभः।
19. प्रयोगसंग्रहः – 4 –7
20. प्रयोगसंग्रहः – 15–16
21. कर्ता वाच्यः– अर्थः यस्मिन् तत् कर्तृवाच्याम्।
22. लिंगवचनविचारः– पं0 दीनबन्धु झा
23. उत्तररामचरितम्– चतुर्थोंकः।
24. मालविकाग्निमित्रम्– प्रथमोंकः।